M. T. B. COLLEGE, SURAT
*Manuscripts Library*

No Ref.
Ser. 766

Title: Tantra-Saṁgraha.

766

तर्कसंग्रह

| | |
|---|---|
| Tarka Samgraha | Title |
| Annam Bhatta | Author |
| | Editor |
| Shaka 1712 | Year, Vols. |
| | Publisher |
| 766 | Remarks |

766

अथतर्कसंग्रहपोथीआरंभोयम्

विभाग॰

तर्कं॰ह १ श्रीगणेशायनमः॥ निधायहृदिविश्वेशं विधायगुरुवंदनं॥ बालानांसुखबोधायक्रि
यतेतर्कसंग्रहः॥१॥ तत्रद्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्याः सप्तैव
पदार्थाः॥ तत्रद्रव्याणि॥ पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसिनवैव॥ तत्ररू
परसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुख
दुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः॥ उत्क्षेपणापक्षेपणाकुंचन
प्रसारणगमनानिपंचकर्माणि॥ परमपरंचेतिद्विविधंसामान्यं॥ नित्यद्रव्यवृत्तयो
विशेषास्त्वनंताएव॥ समवायस्त्वेकएव॥ अभावश्चतुर्विधः॥ प्रागभावःप्रध्वंसा हेरंब १
भावोत्यंताभावोन्योन्याभावश्च॥ तत्रगंधवतीपृथ्वी॥ साद्विधा॥ नित्याअनित्याच॥
नित्यापरमाणुरूपा॥ अनित्याकार्यरूपा॥ शरीरेंद्रियविषयभेदात् शरीरमस्म
पुनस्त्रिविधा

वि
दादीनां इंद्रियंगंधग्राहकंघ्राणंनासाग्रवर्त्ति विषयोमृत्पाषाणादिः शीतस्प
र्शवत्यआपः ताद्विधाः नित्याअनित्याश्च नित्याःपरमाणुरूपाः अनित्याः
पुनस्त्रिविधाः शरीरेंद्रियवि षयभेदात्। कार्यरूपाः॥ शरीरंवरुणलोकेप्रसिद्धं इंद्रियंरसग्राहकंरसनंजिह्वाग्रवर्त्ति
विषयःसरित्समुद्रादिः उष्णस्पर्शवत्तेजः तद्द्विधं नित्यमनित्यंच नित्यं वि
परमाणुरूपं अनित्यंकार्यरूपं॥ शरीरमादित्यलोके इंद्रियंरूपग्राहकंचक्षुः पुनस्त्रिविधं
कृष्णताराग्रवर्त्तिविषयश्चतुर्विधः भौमदिव्योदर्याकरजभेदात् भौमंवह्न्या शरीरेंद्रियवि
दिकं अबिंधनंदिव्यंविद्युदादिभुक्तस्यपरि[illegible]पाकहेतुरोदर्यं आकारजंसुवर्णादि षयभेदात्
रूपरहितस्पर्शवान्वायुः सद्विविधः नित्योनित्यश्च शरीरंवायुलोके इंद्रियं
× नीत्यःपरमाणुरूपः ×८

त०सं० २ स्पर्शग्राहकं त्वक् सर्वशरीरवर्त्ति॥ विषयोरक्षादिकंपनहेतुः शरीरांतःसंचारिवा
युः प्राणः स एकोप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते शब्दगुणमाकाशं त
च्चैकं विभु नित्यंच ॥ अतीतादिव्यवहारहेतुः कालः॥ स चैको विभुर्नित्यश्च॥ प्राच्या
दिव्यवहारहेतुर्दिक् सा चैका नित्या विभ्वी च ज्ञानाधिकरणमात्मा स द्विविधः
ति परमात्मा जीवश्चेति तत्रेश्वरः सर्वज्ञः परमात्मा एक एव जीवात्मा प्रतिशरीरं भि
न्नो विभुर्नित्यश्च सुखाद्युपलब्धिसाधनमिंद्रियं मनः तच्च प्रत्यात्मनियत गा
त्वादनेकं अणुरूपं नित्यंच चक्षुर्मात्रग्राह्यो गुणो रूपं तच्च शुक्लनीलपीतरक्त हेरंब
हरितकपिशचित्रभेदात्सप्तविधं पृथिवीजलतेजोवृत्ति तत्र पृथिव्यां सप्तवि २
धं अभास्वरं शुक्लं जले शुक्लं भास्वरं तेजसि रसनग्राह्यो गुणो रसः स च मधु

स च मधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः पृथिवीजलवृत्तिः जले मधुर
एव घ्राणग्राह्यो गुणो गंधः स द्विविधः सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः
त्वगिंद्रियमात्रग्राह्यो गुणः स्पर्शः स त्रिविधः शीतोष्णानुष्णाशीतभेदात्
पृथिवीजलतेजोवायुवृत्ति तत्र शीतो जले उष्णस्तेजसि अनुष्णाशीतः पृथिवी
वाय्वोः रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यंच अन्यत्रापाकजं नित्यमनित्यं
च नित्यगतं नित्यं अनित्यगतमनित्यं एकत्वादिव्यवहारहेतुः संख्या नवद्रव्य
वृत्तिः एकत्वादिपरार्धपर्यंता एकत्वं नित्यगतं नित्यं अनित्यगतमनित्यं द्वित्वा
दिकं सर्वत्रानित्यमेव मानव्यवहारासाधारणकारणं परिमाणं नवद्रव्यवृत्ति
तच्चतुर्विधं अणुमहद्दीर्घह्रस्वंच पृथग्व्यवहारासाधारणं पृथक्त्वं सर्वद्र
णकार

ज्येष्ठे कालकृतं परत्वं ४

त॰सं॰ व्यवृत्तिः संयुक्तव्यवहारहेतुः संयोगः सर्वद्रव्यवृत्तिः । संयोगनाशको गुणो वि
२ भागः सर्वद्रव्यवृत्तिः परापरव्यवहारासाधारणकारणे परत्वापरत्वे ते द्विवि
धे दिक्कृते कालकृते चेति दूरस्थे दिक्कृतं परत्वं समीपस्थे दिक्कृतमप
रत्वं कनिष्ठे कालकृतं अपरत्वं आद्यपतनासमवायिकारणं गुरुत्वं पृथिवी
जलवृत्तिः आद्यस्यंदनासमवायिकारणं द्रवत्वं पृथिव्यप्तेजोवृत्ति तद्द्विविधं
सांसिद्धिकं नैमित्तिकं च सांसिद्धिकं जले नैमित्तिकं पृथिवीतेजसोः पृथिव्यां घृ ते
तादावग्निसंयोगजं द्रवत्वं तेजसि सुवर्णादौ चूर्णादिपिंडीभावहेतुर्गुणः स्नेहः
जलमात्रवृत्तिः श्रोत्रग्राह्यो गुणः शब्दः आकाशमात्रवृत्तिः स द्विविधः ध्वन्या ३
त्मको वर्णात्मकश्चेति ध्वन्यात्मको भेर्यादौ वर्णात्मकः संस्कृतभाषारूपः सर्वव्यव

हारहेतुर्गुणो बुद्धिः स्मृतिरनुभवश्च संस्कारजन्यं ज्ञानं स्मृतिः तद्भिन्नं ज्ञानमनुभवः
स द्विविधः यथार्थोऽयथार्थश्च तद्वति तत्प्रकारकोऽनुभवो यथार्थः सैव प्रमेत्युच्यते त
न द्भाववति तत्प्रकारकोऽनुभवोऽयथार्थः यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमि
तिशब्दभेदात् तत्कारणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् असा
धारणं कारणं करणं कार्यनियतपूर्ववृत्ति कारणं कार्यं प्रागभावप्रतियोगि कारणं त्रि
विधं समवाय्यसमवायिनिमित्तभेदात् यत्समवेतं कार्यमुत्पद्यते तत् समवायिकार
णं यथा तंतवः पटस्य पटश्च स्वगतरूपादेः कार्येण कारणेन वा सहैकस्मिन्नर्थे
समवेतत्वे सति कारणं असमवायिकारणं यथा तंतुसंयोगः पटस्य तंतु
रूपं पटगतरूपस्य तदुभयभिन्नं कारणं निमित्तकारणं यथा तुरीवेमा

त.क.
४

दिकं परस्य तदेतत्त्रिविधमध्ये यदसाधारणं कारणं निमित्तकरणं तदेव करणं प्रत्य
क्षज्ञानकारणं प्रत्यक्षं इंद्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं तद्द्विविधं निर्विकल्प
कं सविकल्पकं च निष्प्रकारकं ज्ञानं निर्विकल्पकं सप्रकारकं ज्ञानं सविकल्पकं यथा
डित्थोयं ब्राह्मणोयं श्यामोयमिति प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षः ष
ड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतस
मवायः विशेषणविशेष्यभावश्चेति चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निक
र्षः घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः चक्षुःसंयुक्ते घटे रूपस्य समवायात्
रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः चक्षुःसंयुक्ते घटे रू ४
पं समवेतं तत्र रूपत्वस्य समवायात् श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्नि

प्रत्यक्षध्वंसाधिकरणरचितवर्तमाननिरूपणविषयोऽनुमानं वह्निव्याप्यधूमवानयं पर्वत इति परामर्शः

कर्षः कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोः
श्च समवायात् शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेते
शब्दत्वस्य समवायात् अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः घटाभाव
वद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् एवं सन्निकर्षष
ट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धं प्रत्यक्षखंडं समाप्तः ॥
अथानुमानं निरूप्यते अनुमितिकरणमनुमानं परामर्शजन्यं ज्ञानमनुमितिः व्याप्ति
विशिष्टपक्षधर्मताज्ञानं परामर्शः तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः य
त्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्म
ता अनुमानं द्विविधं स्वार्थं परार्थं चेति स्वार्थं स्वानुमितिहेतुः तथा हि स्वयमेव
भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं ग

त०सं. ५ तस्तद्र्शनेचाग्नौसंदिहानः पर्वतेधूमंपश्यन् व्याप्तिंस्मरति यत्रधूमस्तत्राग्नि
रिति तदनंतरंवह्निव्याप्यधूमवानयंपर्वतइतिज्ञानमुत्पद्यते अयमेवलिंग
परामर्शइत्युच्यते तस्मात्पर्वतोवह्निमान् इतिज्ञानमनुमितिरुत्पद्यते तदेत
त्स्वार्थानुमानं यत्तुस्वयंधूमादग्निमनुमायपरप्रतिपत्यर्थं पंचावयववाक्यंप्र
युंक्ते तत्परार्थानुमानं॥ यथापर्वतोवह्निमान् धूमवत्वात् योधूमवान्सोग्निमा
न् यथामहानसः तथाचायं तस्मात्तथा अनेनप्रतिपादितात्लिंगात्परो
प्यग्निंप्रतिपद्यते प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पंचावयवाः प
ति र्वतोवह्निमान् इतिप्रतिज्ञा धूमवत्वादितिहेतुः योयोधूमवान्सोसोग्निमा
न् यथामहानसइत्युदाहरणं तथाचायमित्युपनयः तस्मात्तथेतिनिगम ५
नं स्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्शएवकरणं तस्मात्लिंग

परामर्शोनुमानं लिंगंत्रिविधं अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि
चेति अन्वयव्यतिरेकेणव्याप्तिमदन्वयव्यतिरेकि यथावह्नौसाध्ये धूमवत्वं यत्र
धूमस्तत्राग्निरितिमहानसवदित्यन्वयव्याप्तिः यत्रवह्निर्नास्तितत्रधूमोनास्ति
यथामहाह्रदइतिव्यतिरेकिव्याप्तिः अन्वयमात्रव्याप्तिकेवलान्वयि यथाघ
टोभिधेयःप्रमेयत्वात् पटवत् अत्रप्रमेयत्वाभिधेयत्वाभिधेयत्वयोर्व्यतिरे
कव्याप्तिर्नास्ति सर्वस्यप्रमेयत्वात् अभिधेयत्वाच्च व्यतिरेकव्याप्तिकंकेवलव्य
तिरेकि यथापृथिवीइतरेभ्योभिद्यते गंधवत्वात् यदितरेभ्योनभिद्यतेनतद्गं
धवत् यथाजलंनचेयंतथा तस्मान्नतथेति अत्रयद्गंधवत्तदितरभिन्नमित्य
न्वयदृष्टांतोनास्तिपृथिवीमात्रस्यपक्षत्वात् संदिग्धसाध्यवान्पक्षः यथाधूम
वत्वेहेतौपर्वतः निश्चितसाध्यवान्सपक्षः यथातत्रैवमहानसः निश्चितसाध्या

त॰सं॰ भाववान् विपक्षः यथा तत्रैव ह्रदः सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः
८ पंचहेत्वाभासाः अनैकांतिकः सव्यभिचारः स त्रिविधः साधारणासाधारणानुपसं
हारिभेदात् तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकांतिकः यथा पर्वतो वह्निमान्
प्रमेयत्वात् इति प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् सर्वसपक्षव्यावृत्तः अ
साधारणः यथा शब्दो नित्यः शब्दत्वात् शब्दत्वं सर्वेभ्यो नित्येभ्यो व्यावृत्तं शब्दमात्र भ्यो
वृत्ति॥ अन्वयव्यतिरेकदृष्टांतरहितोऽनुपसंहारी यथा सर्वमनित्यं प्रमेयत्वादिति अ
त्र सर्वस्यापि पक्षत्वात् दृष्टांतो नास्ति साध्याभावव्याप्तो हेतुर्विरुद्धः यथा शब्दो
नित्यः कृतकत्वात् कृतकत्वं हि नित्यत्वाभावेन अनित्यत्वेन व्याप्तं साध्याभा
वसाधकं हेत्वंतरं यस्य स सत्प्रतिपक्षः यथा शब्दो नित्यः श्रावणत्वात् शब्दत्व
वत् शब्दोऽनित्यः कार्यत्वात् घटवत् असिद्धः त्रिविधः आश्रयासिद्धः स्वरूपासि ८

द्धो व्याप्यत्वासिद्धश्चेति आश्रयासिद्धो यथा गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंद
वत् अत्र गगनारविंदं आश्रयः स च नास्त्येव स्वरूपासिद्धो यथा शब्दो गुणः चाक्षुषत्वा
त् अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्॥ सोपाधिको व्याप्यत्वासिद्धः साध्य
व्यापकत्वे सति साधनाव्यापक उपाधिः साध्यसमानाधिकरणात्यंताभावाप्रतियोगित्वं साध्य
व्यापकत्वं साधनवन्निष्ठात्यंताभावप्रतियोगित्वं साधनाव्यापकत्वं यथा पर्वतो धूमवान् व
ह्निमत्त्वात् इत्यत्र आर्द्रेंधनसंयोग उपाधिः यत्र धूमस्तत्र आर्द्रेंधनसंयोगः इति साध्यव्या
पकत्वात् यत्र यत्र वह्निस्तत्र तत्र आर्द्रेंधनसंयोगो नास्ति अयोगोलके आर्द्रेंधनसंयोगाभा
वात् एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेंधनसंयोग उपाधिः सोपाधिकत्वाद्व
ह्निमत्त्वं व्याप्यत्वासिद्धं यस्य साध्याभावः प्रमाणांतरेण निश्चितः स बाधितः यथा वह्नि
रनुष्णः पदार्थत्वात् अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यत इति बाधि

वेदस्त्वोपत्ति

त॰ सं॰ मतं॥ इत्यनुमानखंडं संपूर्णं॥ उपमितिकरणं उपमानं॥ संज्ञासंज्ञिसंबंधज्ञानमुपमितिः त
७ त्करणं सादृश्यज्ञानं तथाहि कश्चिद्गवयशब्दार्थमजानन् कुतश्चिदारण्यकपुरुषाद्गोसदृ
शो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पश्यति तदनंतरं अयं गवयपदवा
च्य इत्युपमितिरुत्पद्यते इति व्याख्यातमुपमानं आप्तवाक्यं शब्दः आप्तस्तु यथार्थव
क्ता वाक्यं पदसमूहः यथा गामानयेति शक्तं पदं अस्मात्पदादयमर्थो बोद्धव्य इति
ईश्वरसंकेतः शक्तिः आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः पदस्य पदांतर
व्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा अर्थाबाधो योग्यता पदानामविलंबेनोच्चार
म णं सन्निधिः आकांक्षादिरहितं वाक्यमप्रमाणं यथा गौरश्वः पुरुषो हस्तीति न प्रमाणं
आकांक्षाविरहात् अग्निना सिंचेदिति न प्रमाणं योग्यताविरहात् प्रहरे प्रहरे असहो ७
च्चरितानि गामानयेत्यादिपदानि सान्निध्याभावात् वाक्यं द्विविधं लौकिकं वैदिकं

च वैदिकं ईश्वरोक्तत्वात्सर्वमेव प्रमाणं लौकिकं तु आप्तोक्तं प्रमाणं अन्यदप्रमाणं
वाक्यार्थज्ञानं शाब्दज्ञानं तत्करणं शब्दः यथार्थानुभवो निरूपितः अयथार्थानुभव
स्त्रिविधः संशयविपर्ययतर्कभेदात् एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञा
नं संशयः यथा स्थाणुर्वा पुरुषो वेति मिथ्याज्ञानं विपर्ययः यथा शुक्ताविदं रजत
मिति व्याप्यारोपेण व्यापकारोपस्तर्कः यथा यदि वह्निर्न स्यात्तर्हि धूमोपि न स्यात्
इति स्मृतिरपि यथार्था अयथार्था च प्रमाजन्या यथार्था सर्वेषामनुकूलत्वेन वेदनीयं
सुखं प्रतिकूलत्वेन वेदनीयं दुःखं इच्छा कामः क्रोधो द्वेषः कृतिः प्रयत्नः विहितकर्म
जन्यो धर्मः निषिद्धकर्मजन्यो धर्मः बुध्यादयोष्टौ आत्ममात्रगुणाः बुद्धीच्छाप्रय
त्ना नित्या अनित्याश्च नित्या ईश्वरस्य अनित्या जीवस्य संस्कारस्त्रिविधः वेगो भाव
ना स्थितिस्थापकश्चेति वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः अनुभवजन्या स्मृतिहे

अप्रमाजन्या अयथार्था

घटाभूतलेघटोनास्ति॥नादात्म्यसंमंधेन

त॰ सं॰ तुर्भावना आत्ममात्रवृत्ति अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटा
९ दिपृथिवीवृत्तिः चलनात्मकंकर्म ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं अधोदेशसंयोगहेतुरपक्षे
पणं प्रसारितस्यपुनरावरणंआकुंचनं शरीरविप्रकृष्टसंयोगहेतुः प्रसारणं अन्यत्सर्वंग
मनं नित्यमेकमनेकानुगतंसामान्यं द्रव्यगुणकर्मवृत्तिपरंसत्ता अपरंद्रव्यत्वादि नित्यद्रव्य
वृत्तयो व्यावर्त्तका विशेषास्त्वनंताएव नित्यसंबंधःसमवायः अयुतसिद्धवृत्ति ययोर्द्वयोर्म
ध्येएकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ यथा अवयवावयविनौ गुणगुणिनौ
क्रियाक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्येचेति अनादिसांतः प्रागभावः उत्पत्तेः पूर्वंकार्य
स्य सादिरनंतः प्रध्वंसाभावः उत्पत्त्यनंतरंकार्यस्य त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यं हरेब
ताभावः यथा घटस्पटोनभवति सर्वेषांपदार्थानांयथायथमुक्तेष्वेवपदार्थेष्वंतर्भावात्सप्तैवपदा
र्थाइतिसिद्धं ॥ काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये अन्नंभट्टेनविदुषा रचितस्तर्कसंग्रहः ॥ ७ ॥ ९
इतितर्कसंग्रहः समाप्तः ॥ शुभंभवतु ॥ श्री भवानीहरिहरेश्वरप्रसन्नोवरदोभवतु ॥ श॰ १७१२